# संस्कृत-वार्ता:

दिनाङ्कः-18.10.2025 सायम् - 06:20

आदौ मुख्यवार्ता:

- जी. एस्. टी. इत्यस्य द्वितीय-संस्करणस्य परिष्कारेण देशस्य अर्थव्यवस्था महतीं वृद्धिम् अवाप्नोत् देयमितौ च अपचितिलाभः सामान्यजनेभ्यः प्रदीयते इति ।
- निर्वाचन-आयोगः अद्य अघोषयत् यत् बिहारराज्यस्य सर्वे कर्मकरमतदातारः, दैनन्दिन-अनौपचारिक-कर्मकराश्च, राज्ये आगामिषु विधानसभा-निर्वाचनेषु मतदानदिनेषु वेतन-सहित-अवकाशदिनानाम् अधिकारिणः भविष्यन्तीति।
- रक्षामंत्री राजनाथसिंहः, उत्तरप्रदेशस्य मुख्यमन्त्री योगी-आदित्यनाथः च अद्य लखनऊ-नगरस्य ब्रह्मोस्-एरोस्पेस्-यूनिट् इत्यस्मिन् एकांशे निर्मितानां ब्रह्मोस्-प्रक्षेपास्त्राणां प्रथम-समूहं ध्वजारोहण-पूर्वकं देशसेवायै समर्पितवन्तौ ।
- अद्य देशस्य विभिन्नेषु भागेषु धन्तेरस्-उत्सवः आचर्यते।
- भारतीय-धनुर्धर्या ज्योति सुरेखा वेन्नम् इत्यनया चीनदेशस्य नानजिङ्ग्-नगरे विश्वकप्-अन्तिम-कांस्यपदकं विजित्य इतिहासं रचितम्।

---------------------------------------------------

<u>जी.एस्.टी-वार्ताहरसम्वादः</u>

केन्द्रीय-वित्त-मन्त्री निर्मला सीतारामनवर्या अवदत् यत्, जी. एस्. टी. इत्यस्य द्वितीय-संस्करणस्य परिष्कारेण देशस्य अर्थव्यवस्था महतीं वृद्धिम् अवाप्नोत्, येन उत्सवसमये इलेक्ट्रानिक्स्, आटोमोबाइल्स्, उपभोक्तृ-वस्तूनि चेत्यादिषु प्रमुख-क्षेत्रेषु सर्वोत्तम-विक्रयणं जातम् अस्ति । सा अद्य नवदिल्ल्यां सूचना-प्रसारण-मन्त्रिणा अश्विनी-वैष्णवेन, वाणिज्य-उद्योग-मन्त्रिणा पियूष्-गोयल् इत्यनेन च सह <u>जी. एस्. टी. बचत्-उत्सव</u> इत्यस्मिन् विषये संयुक्त-वार्ताहर-सम्मेलनं सम्बोधयन्ती आसीत् । वित्तमन्त्रिणा प्रोक्तं यत्, जी. एस्. टी. इत्यस्य

देयमितौ अपचितिलाभः सामान्यजनेभ्यः प्रदीयते इति। अस्मिन् अवसरे वार्तालापं कुर्वन्, सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अवदत् यत्, अस्मिन् वर्षे नवरात्रि-उत्सवे सर्वोत्तम-विक्रयणं दृष्टम् अस्ति । सः अवदत् यत्, अस्मिन् वर्षे नवरात्र्युत्सवावधौ इलेक्ट्रानिक्स् इत्यस्य विक्रयणे पूर्वतनस्य नवरात्रि-उत्सवस्य विक्रयणेन तुल्यं पञ्चविंशति-प्रतिशन्मितस्य वृद्धिः अभवत् इति। सः अवदत् यत्, जी. एस्. टी.-परिष्कारैः खाद्यपदार्थानां मूल्येषु अपि अपचितिः जाता । जी. एस्. टी. बचत्-उत्सव इत्यस्मिन् विषये वाणिज्य-उद्योग-मन्त्री पियूष-गोयल्-वर्यः अवदत् यत्, नवरात्रि-समये वाहनानां विक्रयणं अभूतपूर्वरूपेण वर्धितम् अस्ति । सः अवदत् यत्, एतादृशस्य अस्थिर-वैश्विक-परिदृश्यस्य समये देशस्य वृद्धि एतावता प्रबलगत्या प्रचलन्ती अस्ति येन अन्ताराष्ट्रिय-मुद्रा-कोषेन अपि देशस्य वृद्धेः पूर्वानुमानं संशोध्य षड्-दशमलव-षड्-प्रतिशन्मितं यावत् वर्धितम् अस्ति।

---------------------------------------------------

<u>निर्वाचनायोगः-बिहारः</u>

भारतीय-निर्वाचन-आयोगः अद्य अघोषयत् यत् बिहारराज्यस्य सर्वे कर्मकरमतदातारः, दैनन्दिन-अनौपचारिक-कर्मकराश्च, राज्ये आगामिषु विधानसभा-निर्वाचनेषु मतदानदिनेषु वेतन-सहित-अवकाशदिनानाम् अधिकारिणः भविष्यन्तीति। आयोगेन एतदपि उक्तं यत् विभिन्नानां राज्यानाम् अष्टसु विधानसभाक्षेत्रेषु, यत्र एकादश- नवम्बर-दिनाङ्के उप-निर्वाचनं भविष्यति तत्र नियोजिताः मतदानकर्मिणोऽपि वेतन-सहित-विरामस्य अधिकारिणः भविष्यन्तीति। निर्वाचन-आयोगः सूचितवान् यत् ये निर्वाचकाः निर्वाचनक्षेत्रात् बहिः कार्यं कुर्वन्तः सन्ति परन्तु निर्वाचने गच्छन्तः मतदातारूपेण पञ्जीकृताः सन्ति ते अपि वेतन-सहित-विरामस्य लाभं प्राप्तुं अर्हन्ति इति। आयोगः अवदत् यत् अस्य कार्यस्य उद्देश्यं मतदानस्य वर्धनमस्तीति।

---------------------------------------------------

<u>राजनाथः</u>

रक्षामंत्री राजनाथसिंहः, उत्तरप्रदेशस्य मुख्यमन्त्री योगी-आदित्यनाथः च अद्य लखनऊ-नगरस्य ब्रह्मोस्-एरोस्पेस्-यूनिट् इत्यस्मिन् एकांशे निर्मितानां ब्रह्मोस्-प्रक्षेपास्त्राणां प्रथम-समूहं ध्वजारोहण-पूर्वकं देशसेवायै समर्पितवन्तौ । अस्मिन् अवसरे रक्षामंत्री अवदत् यत् ब्रह्मोस् इत्येतत् न केवलं प्रक्षेपास्त्रम् अपितु देशस्य वर्धमानानां स्वदेशि-क्षमतानां प्रतीकम् अस्ति। सः अवदत् यत्, ब्रह्मोस् इत्यस्य उन्नत-निर्देशित-प्रणालिः अस्ति, यया एतत् सूपर्रसॉनिक्-वेगेन अतिदूरं यावत् प्रहारं कर्तुं शक्नोति । सः अवदत् यत्, वेगस्य, यथार्थतायाः, शक्तेः च संयोगेन ब्रह्मोस् इत्येतत् विश्वस्य सर्वोत्तमासु प्रक्षेपास्त्रप्रणालिषु अन्यतमा वर्तते । सिंह-वर्यः दृढविश्वासं प्रकटितवान् यत् देशस्य शत्रवः अधुना ब्रह्मोस् इत्यस्मात् पलायितुं न शक्नुवन्ति ।

लखनऊ-ब्रह्मोस्-एकांशः उत्तरप्रदेश-रक्षा-विनिर्माणस्य प्रथमसौविध्यम् अस्ति यत्र प्रक्षेपास्त्र-प्रणाल्याः निर्माणात् आरभ्य अन्तिम-परीक्षणपर्यन्तं सम्पूर्णप्रक्रिया स्वदेशे एव विधीयते ।

---------------------------------------------------

## धन्वन्तरी त्रयोदशी

अद्य देशस्य विभिन्नेषु भागेषु धन्तेरस् इति धन्वन्तरित्रयोदश्याः पर्व आचर्यते। अद्य जनाः नूतनानि वस्तूनि, विशेषतः स्वर्ण-रजतादीनि वस्तूनि, नूतनानि पात्राणि च क्रेतुं शुभदिनम् इति मन्यन्ते। अस्मिन् दिने उपकरणानां, वाहनानां च महत् क्रयणम् अपि दृश्यते। प्रधानमन्त्रिणा नरेन्द्रमोदिना धन्तेरस् इति पर्वणि लोकाय शुभाशयाः प्रदत्ताः। अवसरेऽस्मिन् सामाजिक-प्रसार-माध्यमेन श्रीमोदी सर्वेभ्यः सुखस्य, समृद्धेः, सुस्वास्थ्यस्य च प्रार्थनां कृतवान्। सः आशां प्रकटितवान् यत् धन्वन्तरिभगवान् सर्वेभ्यः नागरिकेभ्यः विपुलं आशीर्वादं दद्यादिति। केन्द्रीय-गृह-मन्त्री अमितशाहः, भाजपा-अध्यक्षः जे. पी. नड्डाः च अस्मिन् अवसरे जनेभ्यः शुभाशयाः प्रेषितवन्तौ।

---------------------------------------------------

## बिहार-निर्वाचनम्

बिहारविधानसभा-निर्वाचनस्य प्रथमचरणाय नामाङ्कनानां परीक्षणं प्रचलति। अस्मै चरणाय आहत्य अष्ट-नवत्युत्तर-षड्-शताधिकैकसहस्र- नामाङ्कनपत्राणि प्रेषितानि। अभ्यर्थिनः अस्य मासस्य विंशति-दिनाङ्कपर्यन्तं नामाङ्कनानां प्रत्यावर्तनं कर्तुं शक्नुवन्ति । प्रथमचरणे अग्रिम मासस्य षड्-दिनाङ्के अष्टादश-मण्डलेषु प्रसृतेषु एकविंशत्यधिकैकशत- विधानसभाक्षेत्रेषु मतदानं भविष्यति। एतन्मध्ये, सी. पी. आई. (एम्. एल्.) इत्यनेन दलेन विंशति-अभ्यर्थिनां सूचिः प्रकाशिता। एतेषु चतुर्दश-अभ्यर्थिनः प्रथमस्य चरणस्य कृते पूर्वमेव नामाङ्कनं कृतवन्तः सन्ति ।

---------------------------------------------------

<u>बाङ्ग्लादेश-अग्निः</u>

बाङ्ग्लादेश्-देशे अद्य अपराह्णे ढाका-नगरस्य हजरत्-शाहजलाल्-अन्ताराष्ट्रिय-विमानस्थानकस्य कार्गो-क्षेत्रे महान् अग्निप्रकोपः अभवत्, येन अग्निशामकाः अग्निं नियन्त्रयितुं प्रयतन्ते इति कारणात् अधिकारिणः सर्वान् विमान-परिचालनान् स्थगयितुं बाध्याः अभवन्। अग्निशामकसेवायाः नागरिकरक्षायाः च अनुसारं आहत्य द्वात्रिंशत् अग्निशामकदलानि स्थलं प्रेषितानि । अधिकारिणः अधुनापि अग्निकाण्डस्य कारणं क्षतेः वा आकलनं कुर्वन्ति ।

---------------------------------------------------

<u>महा-दुर्घटनाः</u>

महाराष्ट्रे नन्दूर्बार्-जनपदस्य तलोडा-तालुका इत्यस्य चन्द्शैलि-घाट इत्यत्र जातायां वाहनदुर्घटनायां अष्ट जनाः मृताः, अष्टविंशति जनाः व्रणिताः च । पीडिताः अद्य प्रातः अस्तम्बा-तीर्थयात्रातः प्रत्यागच्छन्ति स्म एषा यदा दुर्घटना अभवत्। प्रारम्भिकसूचनानुसारं चतुर्विंशतितः अधिकाः जनाः वाहने यात्रां कुर्वन्तः आसन् । व्रणितेषु पञ्चदश-जनानां स्थितिः गम्भीरः इति आरक्षिबलं अकथयत् । व्रणिताः प्रथमं तलोडा-उपमण्डल-चिकित्सालये नीताः सन्ति , अनन्तरं च चिकित्सायै नन्दूर्बार्-मण्डल-चिकित्सालयं प्रति

स्थानान्तरिताः । व्रणितेषु नन्दूर्बर्-उपमण्डलस्य, नगरस्य च घोटाने, शम्शेरपुर्, शबरीहट्टी-क्षेत्राणां निवासिनः सन्ति ।

---------------------------------------------------

<u>शरसन्धानस्पर्धा</u>

भारतीय-धनुर्धर्या ज्योति-सुरेखा-वेन्नम् इत्यनया चीनदेशस्य नानजिङ्ग्-नगरे कांस्यपदकं प्राप्य, धनुर्विद्यायाः विश्वकप् इति अन्तिमस्पर्धायां पदकम् अवाप्य प्रथम-भारतीय-महिलारूपेण इतिहासमपि रचितवती ।

॥ इति वार्ताः ॥